School Lecturer [Sanskrit Edu. Deptt.] Exam - 2024
Exam Date:- 20.11.2024

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16
पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

**Paper Code : 06**

# LSK-24

**इस प्रश्न-पुस्तिका को तब तक न खोलें जब तक कहा न जाए । Do not open this Question Booklet until you are asked to do so.**

प्रश्न-पुस्तिका संख्या व बारकोड/
Question Booklet No. & Barcode

812125

## Sub : Samanya Vyakranam
## Paper-II

**समय : 03 घण्टे + 10 मिनट अतिरिक्त***
**Time : 03 Hours + 10 Minutes Extra***

**अधिकतम अंक : 300**
**Maximum Marks : 300**

**प्रश्न-पुस्तिका के पेपर की सील/पॉलिथीन बैग को खोलने पर प्रश्न-पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :**
- **प्रश्न-पुस्तिका संख्या तथा ओ.एम.आर. उत्तर-पत्रक पर अंकित बारकोड संख्या समान है ।**
- **प्रश्न-पुस्तिका एवं ओ.एम.आर. उत्तर-पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं । समस्त प्रश्न, जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है/ मुद्रण त्रुटि नहीं है ।**

**किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें । यह सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी । परीक्षा प्रारम्भ होने के 5 मिनट पश्चात् ऐसे किसी दावे/आपत्ति पर कोई विचार नहीं किया जायेगा ।**

**On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper, the candidate should ensure that :**
- **Question Booklet Number and Barcode Number of OMR Answer Sheet are same.**
- **All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.**

**If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after five minutes of start of examination.**

## परीक्षार्थियों के लिए निर्देश

1. **प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है ।**
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का मात्र **एक** ही उत्तर दीजिए । एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
4. **OMR** उत्तर-पत्रक इस प्रश्न-पुस्तिका के अन्दर रखा है । जब आपको प्रश्न-पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें ।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर-पत्रक पर सावधानीपूर्वक सही भरें । गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा ।
6. **ओ.एम.आर. उत्तर-पत्रक में करेक्शन पेन/व्हाईटनर/सफेदा का उपयोग निषिद्ध है ।**
7. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा** । गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है ।
8. **प्रत्येक प्रश्न के पाँच विकल्प दिये गये हैं, जिन्हें क्रमशः 1, 2, 3, 4, 5 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर-पत्रक पर नीले बॉल पॉइंट पेन से गहरा करना है ।**
9. **यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं तो उत्तर-पत्रक में पाँचवें (5) विकल्प को गहरा करें । यदि पाँच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा ।**
10.* **प्रश्न-पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. उत्तर-पत्रक जाँच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है । इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है ।**
11. **यदि अभ्यर्थी 10% से अधिक प्रश्नों में पाँच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है, तो उसको अयोग्य माना जायेगा ।**
12. मोबाइल फोन अथवा अन्य किसी इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए **राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022 तथा अन्य प्रभावी कानून एवं आयोग के नियमों-प्रावधानों** के तहत कार्यवाही की जाएगी । साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question. If more than one answers are marked, it would be treated as wrong answer.
4. The **OMR** Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **Blue Ball Point Pen** only.
5. Please correctly fill your Roll Number in **OMR** Answer Sheet. Candidate will themself be responsible for filling wrong Roll No.
6. **Use of Correction Pen/Whitener in the O.M.R. Answer Sheet is strictly forbidden.**
7. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
8. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
9. **If you are not attempting a question then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**
10.* **After solving question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time, is provided for this.**
11. **A candidate who has not darkened any of the five circles in more than 10% questions, shall be disqualified.**
12. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair Means in Recruitment) Act, 2022 & any other laws applicable and Commission's Rules-Regulations.** Commission may also debar him/her permanently from all future examinations.

**उत्तर-पत्रक में दो प्रतियाँ हैं – मूल प्रति और कार्बन प्रति। परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर-पत्रक की दोनों प्रतियाँ वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें। वीक्षक उत्तर-पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाइन से मोड़ कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, जिसे परीक्षार्थी अपने साथ ले जायेंगे। परीक्षार्थी को उत्तर-पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा माँगे जाने पर प्रस्तुत करनी होगी।**

**06-□**

1. 'बालक उपाध्याय से पढ़ता है' इति वाक्यस्य संस्कृतानुवादः वर्तते –
(1) बालकः उपाध्यायेन अधीते
(2) बालकः उपाध्यायाद् अधीते
(3) बालकेन उपाध्यायेन पठति
(4) बालकः उपाध्यायास्य अधीते
(5) अनुत्तरितः प्रश्नः

2. शुद्धं वाक्यं चिनुत –
(1) भिक्षुर्दिनद्वयः विहारे प्रवचनं शृणोति स्म
(2) भिक्षुर्दिनद्वयं विहारे प्रवचनं शृणोति स्म
(3) भिक्षुर्दिनद्वये विहारं प्रवचनं शृणोति स्म
(4) भिक्षुं दिनद्वयं विहारे प्रवचनं शृणोति स्मं
(5) अनुत्तरितः प्रश्नः

3. एषु शुद्धं वाक्यं चिनुत –
(1) एतत् प्रश्नं तं छात्रं पृच्छ
(2) एतं प्रश्नं तं छात्रं पृच्छ
(3) एतेन प्रश्नेन तेन प्रच्छ
(4) एतं प्रश्नं तस्मै छात्रं पृच्छ
(5) अनुत्तरितः प्रश्नः

4. अत्र यद्वाक्यं शुद्धमस्ति तच्चिनुत –
(1) सर्वे पदे हस्तिपदे निमग्नाः
(2) सर्वे पदाः हस्तिपदे निमग्नाः
(3) सर्वे पादाः हस्तिपादे निमग्नाः
(4) सर्वपदाः हस्तिपादे निमग्नः
(5) अनुत्तरितः प्रश्नः

5. 'ब्राह्मणास्त्रिकालं सूर्यमुपतिष्ठन्ति' इत्यत्र 'उपतिष्ठन्ति' इत्यशुद्धपदस्थाने शुद्धं पदं चिनुत –
(1) उपातिष्ठन्ति (2) उपतिष्ठसे
(3) उपतिष्ठसि (4) उपतिष्ठन्ते
(5) अनुत्तरितः प्रश्नः

6. शुद्धं वाक्यं चिनुत –
(1) वनस्य निकषा सरसी वर्तते
(2) वनात् निकषा सरसी वर्तते
(3) वनं निकषा सरसी वर्तते
(4) वने निकषा सरसी वर्तते
(5) अनुत्तरितः प्रश्नः

7. अत्र किमसङ्गतं रूपं वर्तते ?
(1) भवन्ति – लटि प्रथमपुरुषबहुवचने
(2) भवितास्थ – लुटि मध्यमपुरुषबहुवचने
(3) अभूः – लुङि मध्यमपुरुषैकवचने
(4) बभूवुः – लिटि प्रथमपुरुषद्विवचने
(5) अनुत्तरितः प्रश्नः

8. 'हन्' धातोः लुङिरूपं वर्तते –
(1) अघ्नन् (2) अवधीः
(3) अहन् (4) अवधिस्ताम्
(5) अनुत्तरितः प्रश्नः

9. 'नम्' धातोः लिटि उत्तमपुरुषैकवचने 'ननाम' इत्यस्य वैकल्पिकं रूपं किम् ?
(1) ननम (2) ननम्
(3) नंनम्म (4) निनाम
(5) अनुत्तरितः प्रश्नः

10. "अपाः" धातुरूपमस्ति –
(1) 'आप्लृ' धातोः लुट्लकारे मध्यमपुरुषैकवचने
(2) 'पा' धातोः लुङि मध्यमपुरुषैकवचने
(3) 'पा' धातोः लिटि मध्यमपुरुषैकवचने
(4) 'आप्लृ' धातोः लोटि प्रथमपुरुषबहुवचने
(5) अनुत्तरितः प्रश्नः

11. लट्लकारस्य द्विवचने रूपाणि सन्ति –
(1) पचतः, गच्छत, ददृशुः, लिखामः, हत, शक्नुथ
(2) वदथः, भवावः, पश्यतः, हतः, दत्तः, कुर्वः
(3) भवतः, लिखत, पिबन्तु, दत्थ, वदथ
(4) गच्छावः, पश्याव, भवत, नंस्यथः, शक्नुवः, वदन्तु
(5) अनुत्तरितः प्रश्नः

12. कुर्वीरन्, कृषीरन्, अकृत, कुरुष्व–इत्येतेषां रूपाणां यथाक्रमं समुचितलकारसमूहं चिनुत –
(1) लिङ्, विधिलिङ्, लुङ्, लट्
(2) विधिलिङ्, आशीर्लिङ्, लुङ्, लोट्
(3) आशीर्लिङ्, विधिलिङ्, लङ्, लोट्
(4) विधिलिङ्, लुङ्, आशीर्लिङ्, लोट्
(5) अनुत्तरितः प्रश्नः

**13.** पद–लकारयोः सुसंगतं मेलनं कुरुत –

| | | | |
|---|---|---|---|
| क. | लब्धा | i. | विधिलिङ्लकारे |
| ख. | सेवेय | ii. | आशीर्लिङ्लकारे |
| ग. | असानि | iii. | लुट्लकारे |
| घ. | लप्सीय | iv. | लोट्लकारे |

**कूट :**

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | i | iii | iv | ii |
| (2) | iv | iii | ii | i |
| (3) | iii | ii | iv | i |
| (4) | iii | i | iv | ii |

(5) अनुत्तरितः प्रश्नः

**14.** सुधियाम्, पत्यौ, गाः च एतानि त्रीणि रूपाणि क्रमशः सन्ति

(1) सप्तम्येकवचनस्य, प्रथमाद्विवचनस्य, षष्ठीबहुवचनस्य

(2) सप्तम्येकवचनस्य, द्वितीयाद्विवचनस्य, द्वितीयाबहुवचनस्य

(3) षष्ठीबहुवचनस्य, सप्तम्येकवचनस्य, द्वितीयाबहुवचनस्य

(4) षष्ठीबहुवचनस्य, सप्तम्येकवचनस्य, षष्ठी–एकवचनस्य

(5) अनुत्तरितः प्रश्नः

**15.** "गो" शब्दस्य षष्ठीबहुवचने रूपं भवति –

(1) गोनाम् (2) गोमान्

(3) गावाम् (4) गवाम्

(5) अनुत्तरितः प्रश्नः

**16.** शब्दानां सुष्ठु मेलनं कुरुत –

| | | | |
|---|---|---|---|
| क. | सुधीः | i. | पञ्चमीषष्ठ्योरेकवचने |
| ख. | गुरोः | ii. | सप्तम्येकवचने |
| ग. | कर्त्रोः | iii. | प्रथमैकवचने |
| घ. | पितरि | iv. | षष्ठीसप्तम्योः द्विवचने |

**कूट :**

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | iii | i | iv | ii |
| (2) | iii | i | ii | iv |
| (3) | i | ii | iii | iv |
| (4) | i | ii | iv | iii |

(5) अनुत्तरितः प्रश्नः

**17.** पुँल्लिङ्गे रूपाणि सन्ति –

(1) तानि, अमुष्मै, एतस्य, तस्याम्, अस्य

(2) सर्वैः, अमूषाम्, अस्मान्, अनया, तव

(3) अमू, इमे, यस्मै, तस्मिन्, हरीन्

(4) अस्याः, अमून्, अमूः, इमाः, एते

(5) अनुत्तरितः प्रश्नः

**18.** 'आत्मन्' शब्दस्य सप्तम्येकवचने किं रूपम् ?

(1) आत्मे (2) आत्मनि

(3) आत्मयि (4) आत्मन्याम्

(5) अनुत्तरितः प्रश्नः

**19.** शब्द–विभक्त्योः सुमेलनं कुरुत –

| | | | |
|---|---|---|---|
| क. | जगता | i. | चतुर्थ्येकवचने |
| ख. | नाम्नः | ii. | सप्तम्येकवचने |
| ग. | विदुषे | iii. | तृतीयैकवचने |
| घ. | मनसि | iv. | पञ्चम्येकवचने |

**कूट :**

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | iii | i | iv | ii |
| (2) | iii | iv | i | ii |
| (3) | iv | iii | i | ii |
| (4) | iv | ii | iii | i |

(5) अनुत्तरितः प्रश्नः

**20.** पितृशब्दस्य शुद्धं रूपं नास्ति –

(1) पितृणाम् (2) पितरि

(3) पितुः (4) हे पितः !

(5) अनुत्तरितः प्रश्नः

**21.** एतेषु समीचीनं युग्मं नास्ति –

(1) देयम् – यप्

(2) शिष्यः – क्यप्

(3) कार्यम् – ण्यत्

(4) मार्ग्यः – ण्यत्

(5) अनुत्तरितः प्रश्नः

**22.** एतेषु 'क' प्रत्ययस्योदाहरणं किम् ?

(1) कारकः (2) कुरुचरः

(3) सुग्लः (4) वशंवदः

(5) अनुत्तरितः प्रश्नः

23. "यशस्करी" इत्यत्र कस्मिन्नर्थे कश्च प्रत्ययो भवति ?
(1) हेत्वादौ, ट् प्रत्ययः
(2) अहेत्वादौ, अच् प्रत्ययः
(3) अहेतौ, ट् प्रत्ययः
(4) आनुलोम्ये, ताच्छील्ये, खश् प्रत्ययः
(5) अनुत्तरितः प्रश्नः

24. 'प्रजा' इत्यत्र कृत्प्रत्ययः कः ?
(1) डः  (2) कः
(3) टः  (4) अच्
(5) अनुत्तरितः प्रश्नः

25. शब्द-प्रत्यययोः सुमेलनं कुरुत –

| | | | |
|---|---|---|---|
| क. | प्रियः | i. | क |
| ख. | कुरुचरः | ii. | ट |
| ग. | सरोजम् | iii. | ल्यु |
| घ. | नन्दनः | iv. | ड |

**कूट :**

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | ii | iii | iv | i |
| (2) | ii | iv | i | iii |
| (3) | i | iii | iv | ii |
| (4) | i | ii | iv | iii |

(5) अनुत्तरितः प्रश्नः

26. एषु किम् असमीचीनं वर्तते ?
(1) मोदमानः – शतृ-प्रत्ययः
(2) आरोढुम् – तुमुन्-प्रत्ययः
(3) गत्वा – क्त्वा-प्रत्ययः
(4) जल्पाकः – षाकन्-प्रत्ययः
(5) अनुत्तरितः प्रश्नः

27. "अव्ययं विभक्तिसमीप" इत्यादि सूत्रे यथाशब्दस्य कति अर्था भवन्ति ?
(1) षट्  (2) चत्वारः
(3) त्रयः  (4) पञ्च
(5) अनुत्तरितः प्रश्नः

28. 'नदीभिश्च' इति सूत्रेण विहितः समासः कस्मिन्नर्थे भवति ?
(1) विभक्त्यर्थे  (2) समीपार्थे
(3) समाहारेऽर्थे  (4) चार्थे
(5) अनुत्तरितः प्रश्नः

29. शुद्धपदसमूहः वर्तते –
(1) उपकृष्णम्, उपकृष्णे, उपकृष्णेन, उपकृष्णात्
(2) उपकृष्णम्, उपकृष्णाय, उपकृष्णस्य, उपकृष्णेभ्यः
(3) उपकृष्णेन, उपकृष्णे, उपकृष्णात्, उपकृष्णस्य
(4) उपकृष्णाय, उपकृष्णाभ्याम्, उपकृष्णैः, उपकृष्णानाम्
(5) अनुत्तरितः प्रश्नः

30. "पौर्वशालः" इत्यत्र समासविधायकं सूत्रं किम् ?
(1) दिक्संख्ये संज्ञायाम्
(2) तद्धितार्थोत्तरपदसमाहारे च
(3) विशेषणं विशेष्येण बहुलम्
(4) अर्धं नपुंसकम्
(5) अनुत्तरितः प्रश्नः

31. "नीलोत्पलम्" इत्यत्र समासविधायकं सूत्रमस्ति –
(1) कुगतिप्रादयः
(2) तद्धितार्थोत्तरपदसमाहारे च
(3) उपमानानि सामान्यवचनैः
(4) विशेषणं विशेष्येण बहुलम्
(5) अनुत्तरितः प्रश्नः

32. कस्य विग्रहस्य परिनिष्ठितरूपे 'रात्राह्नाहाः पुंसि' इत्यस्य प्रवृत्तिर्न भवति ?
(1) द्वयोः रात्र्योः समाहारः
(2) अहश्च रात्रिश्च
(3) पूर्वा चासौ रात्रिश्च
(4) सङ्ख्याता चासौ रात्रिश्च
(5) अनुत्तरितः प्रश्नः

**33.** समाससमस्तपदयोः संगतिं चिनुत –

| | |
|---|---|
| क. पीताम्बरः | i. अव्ययीभावः |
| ख. शिवकेशवौ | ii. तत्पुरुषः |
| ग. सहरि | iii. बहुव्रीहिः |
| घ. चोरभयम् | iv. द्वन्द्वः |

**कूट :**

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | iii | iv | i | ii |
| (2) | iv | i | ii | iii |
| (3) | i | ii | iii | iv |
| (4) | ii | iii | iv | i |

(5) अनुत्तरितः प्रश्नः

**34.** अत्र असमीचीनं युग्मं चिनुत –

(1) द्वन्द्वे घि – हरिहरौ
(2) अल्पाच्तरम् – शिवकेशवौ
(3) पिता मात्रा – मातापितरौ
(4) अजाद्यदन्तम् – वाक्त्वचम्
(5) अनुत्तरितः प्रश्नः

**35.** "उद्धृतौदना" स्थालीत्यस्य का व्युत्पत्तिः ?

(1) उद्धृतं चाद ओदनम्
(2) उद्धृता ओदनाः यस्याः
(3) उद्धृता ओदना यस्मात्
(4) उद्गत ओदनो यस्मै
(5) अनुत्तरितः प्रश्नः

**36.** "नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च" इत्यत्र यदलं पदं तत् कमर्थं बोधयति ?

(1) पर्यायार्थम् (2) समाप्त्यर्थम्
(3) भूषार्थम् (4) पर्याप्त्यर्थम्
(5) अनुत्तरितः प्रश्नः

**37.** अभिहिते कर्मणि का विभक्तिर्भवति ?

(1) द्वितीया (2) चतुर्थी
(3) सप्तमी (4) प्रथमा
(5) अनुत्तरितः प्रश्नः

**38.** क्रियासिद्धौ प्रकृष्टोपकारकस्य का सञ्ज्ञा भवति ?

(1) कर्मसञ्ज्ञा (2) अधिकरणसञ्ज्ञा
(3) सम्प्रदानसञ्ज्ञा (4) करणसञ्ज्ञा
(5) अनुत्तरितः प्रश्नः

**39.** 'रामेण बाणेन हतो बाली' इत्यत्र कर्ता कः ?

(1) बाली (2) रामेण
(3) बाणेन (4) हतः
(5) अनुत्तरितः प्रश्नः

**40.** 'अधिशीङ्स्थासां कर्म' इति सूत्रस्योदाहरणं नास्ति –

(1) उत्तिष्ठति वैकुण्ठं हरिः
(2) अधितिष्ठति वैकुण्ठं हरिः
(3) अध्यास्ते वैकुण्ठं हरिः
(4) अधिशेते वैकुण्ठं हरिः
(5) अनुत्तरितः प्रश्नः

**41.** "दिवः कर्म च" इत्यत्र उक्तेन चकारेण या संज्ञा सा का ?

(1) अधिकरणसंज्ञा (2) अपादानसंज्ञा
(3) करणसंज्ञा (4) सम्प्रदानसंज्ञा
(5) अनुत्तरितः प्रश्नः

**42.** "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिकोपः" इत्यत्र सूत्रे प्रयुक्तस्य असूयाशब्दस्य कोऽर्थः ?

(1) गुणेषु दोषाविष्करणम्
(2) दोषेषु गुणाविष्करणम्
(3) दोषगुणयोरपाकरणम्
(4) गुणाविष्करणे दोषापवारणम्
(5) अनुत्तरितः प्रश्नः

**43.** 'आश्चर्यो गवां दोहोऽगोपेन' इत्युदाहरणं कस्य सूत्रस्य ?

(1) 'कर्तृकर्मणोः कृति' इति सूत्रस्य
(2) 'उभयप्राप्तौ कर्मणि' इति सूत्रस्य
(3) 'कर्तुरीप्सिततमं कर्म' इति सूत्रस्य
(4) 'अकथितं च' इति सूत्रस्य
(5) अनुत्तरितः प्रश्नः

**44.** सूत्रोदाहरणयोः सम्यक् युग्मं चिनुत –

| | | | |
|---|---|---|---|
| क. | जनिकर्तुः प्रकृतिः | i. | चौरात् त्रायते |
| ख. | भुवः प्रभवः | ii. | मातुर्निलीयते कृष्णः |
| ग. | भीत्रार्थानां भयहेतुः | iii. | हिमवते गङ्गा प्रभवति |
| घ. | अन्तर्धौ येनादर्शनमिच्छति | iv. | ब्रह्मणः प्रजाः प्रजायन्ते |

कूट :

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | iv | iii | ii | i |
| (2) | iv | ii | iii | i |
| (3) | iv | i | ii | iii |
| (4) | iv | iii | i | ii |

(5) अनुत्तरितः प्रश्नः

**45.** 'यतश्च निर्धारणम्' इति सूत्रेण विभक्ती भवतः –

(1) पञ्चमी, षष्ठी च (2) द्वितीया, चतुर्थी च
(3) तृतीया, षष्ठी च (4) षष्ठी, सप्तमी च
(5) अनुत्तरितः प्रश्नः

**46.** एतेषु वार्णिकच्छन्दो नास्ति –

(1) अनुष्टुप् (2) भुजङ्गप्रयातम्
(3) आर्या (4) पुष्पिताग्रा
(5) अनुत्तरितः प्रश्नः

**47.** यत्र क्रमशः मः सजौ सः तौ गुः स्युस्तत्र किन्नाम छन्दः ?

(1) शिखरिणी
(2) शार्दूलविक्रीडितम्
(3) मन्दाक्रान्ता
(4) हरिणी
(5) अनुत्तरितः प्रश्नः

**48.** वंशस्थच्छन्दसः लक्षणं ह्रस्वदीर्घसंकेतैः चिनुत –

(1) SIS III SII IIS
(2) ISI IIS SSI SS
(3) III III SSS ISS ISS
(4) ISI SSI ISI SIS
(5) अनुत्तरितः प्रश्नः

**49.** "विषमे सौ जगौ समे, सः भंरौ लश्च" स्युः तत्र छन्दसः किं नाम भवेत् ?

(1) स्रग्धरा (2) वसन्ततिलका
(3) हरिणी (4) वियोगिनी
(5) अनुत्तरितः प्रश्नः

**50.** षड्भिरेकादशभिश्च वर्णैर्यतिरस्तीति वृत्तं नाम किम् ?

(1) शिखरिणी (2) हरिणी
(3) मन्दाक्रान्ता (4) मालिनी
(5) अनुत्तरितः प्रश्नः

**51.** "प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः" इत्यत्र यच्छन्दस्तत् किन्नाम्ना निगद्यते ?

(1) हरिणी (2) स्रग्धरा
(3) शार्दूलविक्रीडितम् (4) शिखरिणी
(5) अनुत्तरितः प्रश्नः

**52.** "अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्वभोग्ये" इत्यत्र छन्दोनाम किम् ?

(1) शिखरिणी (2) हरिणी
(3) मन्दाक्रान्ता (4) स्रग्धरा
(5) अनुत्तरितः प्रश्नः

**53.** मालिनी–छन्दसि यतिः भवति –

(1) अष्टाभिः षड्भिश्चाक्षरैः
(2) अष्टाभिः सप्तभिश्चाक्षरैः
(3) षड्भिः अष्टाभिश्चाक्षरैः
(4) प्रति सप्तभिरक्षरैः
(5) अनुत्तरितः प्रश्नः

**54.** "उपवनान्तलताः पवनाहतैः" इत्यत्र छन्दोऽस्ति –

(1) वंशस्थः (2) द्रुतविलम्बितम्
(3) उपजातिः (4) इन्द्रवज्रा
(5) अनुत्तरितः प्रश्नः

55. एतेषां सुमेलनं कुरुत –

| | | | |
|---|---|---|---|
| क. | म्नौ ज्रौ गस्त्रिदशयतिः | i. | प्रहर्षिणी |
| ख. | यैश्चतुर्भिः | ii. | अनुष्टुप् |
| ग. | यदि तौ जगौ गः | iii. | भुजंगप्रयातम् |
| घ. | द्विचतुष्पादयोर्ह्रस्वम् सप्तमम् | iv. | इन्द्रवज्रा |

कूट :

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | i | ii | iv | iii |
| (2) | i | iv | ii | iii |
| (3) | ii | iii | iv | i |
| (4) | i | iii | iv | ii |

(5) अनुत्तरितः प्रश्नः

56. वित्तस्य कति गतयो भवन्ति ?

(1) द्वे (2) तिस्रः
(3) चतस्रः (4) पञ्च
(5) अनुत्तरितः प्रश्नः

57. युग्मान् साधु मेलयत –

| | | | |
|---|---|---|---|
| क. | जाड्यं धियो हरति | i. | विद्या |
| ख. | जयन्ति ते सुकृतिनः | ii. | संस्कृता वाणी |
| ग. | बन्धुजनो विदेशगमने | iii. | सत्संगतिः |
| घ. | पुरुषं का समलंकरोति | iv. | कवीश्वराः |

कूट :

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | iii | iv | ii | i |
| (2) | iii | ii | iv | i |
| (3) | ii | iii | i | iv |
| (4) | iii | iv | i | ii |

(5) अनुत्तरितः प्रश्नः

58. दुरात्मनां प्रकृतिसिद्धं नास्ति –

(1) अकरुणत्वम्
(2) परधने परयोषिति च स्पृहा
(3) सुजनबन्धुजनेष्वसहिष्णुता
(4) सेवाधर्मः परमगहनः
(5) अनुत्तरितः प्रश्नः

59. सर्वस्यौषधमस्ति शास्त्रविहितं नास्त्यौषधं कस्य ?

(1) ज्ञानिनः (2) मीमांसकस्य
(3) नैयायिकस्य (4) मूर्खस्य
(5) अनुत्तरितः प्रश्नः

60. "नमस्यामो देवान्नु हतविधेस्तेऽपि वशगा" अस्मिन् श्लोके कस्य वर्णनम् अस्ति ?

(1) भाग्यस्य (2) कर्मणः
(3) धनस्य (4) विद्यायाः
(5) अनुत्तरितः प्रश्नः

61. 'प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः' इति पङ्क्ति कस्य सन्दर्भेऽस्ति ?

(1) आम्रकूटपर्वतसन्दर्भे
(2) निर्विन्ध्यानदीसन्दर्भे
(3) दशार्णजनपदसन्दर्भे
(4) गम्भीरानदीसन्दर्भे
(5) अनुत्तरितः प्रश्नः

62. अलकापुर्यां यक्षस्य भवनं कुत्र अवस्थितम् ?

(1) मानसरोवरस्य उत्तरेण
(2) रेवायाः पूर्वेण
(3) धनपतिगृहादुत्तरेण
(4) अलकापुर्याः मध्ये
(5) अनुत्तरितः प्रश्नः

63. "तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिर्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः" इत्यत्र 'तस्याः' पदेन किमभिहितम् ?

(1) नर्मदा (2) आम्रकूटः
(3) रामगिरिः (4) दशार्णाः
(5) अनुत्तरितः प्रश्नः

64. "इत्थंभूतां प्रथमविरहे तामहं तर्कयामि" इत्यत्र 'अहं' इति पदं कस्य कृते प्रयुक्तम् ?

(1) मेघस्य कृते (2) यक्षस्य कृते
(3) यक्षिण्याः कृते (4) पर्वतस्य कृते
(5) अनुत्तरितः प्रश्नः

65. 'प्रद्योतस्य प्रियदुहितरं कः जह्रे' ? मेघदूतदिशा प्रतिपादयत ।

(1) खद्योतराजः (2) वत्सराजः
(3) गन्धर्वराजः (4) सुरपतिः
(5) अनुत्तरितः प्रश्नः

**66.** कासां तिथीनां रिक्ता सञ्ज्ञा भवति ?

(1) पञ्चमी–षष्ठी–नवमीनाम्

(2) द्वितीय–सप्तमी–द्वादशीनाम्

(3) चतुर्थी–अष्टमी–त्रयोदशीनाम्

(4) चतुर्थी–नवमी–चतुर्दशीनाम्

(5) अनुत्तरितः प्रश्नः

**67.** राशि–वर्णयोः सुष्ठु मेलनं कुरुत –

| | |
|---|---|
| क. कर्कालिमीनाः | i. नृपः |
| ख. मेषसिंहौधनुः | ii. विप्राः |
| ग. वृषकन्यामृगाः | iii. शूद्राः |
| घ. युग्मतुलाघटाः | iv. वैश्याः |

**कूट :**

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | iii | i | ii | iv |
| (2) | i | ii | iii | iv |
| (3) | ii | i | iv | iii |
| (4) | ii | iv | iii | i |

(5) अनुत्तरितः प्रश्नः

**68.** अभिजित् – मुहूर्त्तस्य अपरा सञ्ज्ञा का ?

(1) 'कुतुप' इति (2) 'दारुण' इति

(3) 'व्यतिपात' इति (4) 'सौम्य' इति

(5) अनुत्तरितः प्रश्नः

**69.** वृषकन्यामकरराशीनां चन्द्रः कस्यां दिशि भवति ?

(1) प्राच्याम् (2) उदीच्याम्

(3) याम्य–दिशि (4) प्रतीच्याम्

(5) अनुत्तरितः प्रश्नः

**70.** अमृतयोगो न भवति –

(1) शुक्रवारे रिक्तातिथिः भवेत्

(2) चन्द्रार्कयोः भवेत् पूर्णा

(3) भौमवारे भद्रातिथिः स्यात्

(4) गुरुवारे नन्दातिथिः स्यात्

(5) अनुत्तरितः प्रश्नः

**71.** भरतमुनिः नाट्यार्थम् ऋग्वेदात् किं जग्राह ?

(1) रसान् (2) गीतिम्

(3) अभिनयान् (4) पाठ्यम्

(5) अनुत्तरितः प्रश्नः

**72.** "क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्" इति वाक्यं कैरुक्तम् ?

(1) ऋषिभिः

(2) दानवादिभिः

(3) महेन्द्र–प्रमुखैर्देवैः

(4) सामान्य–जनताभिः

(5) अनुत्तरितः प्रश्नः

**73.** महेन्द्रविजयोत्सवे नान्दी कियती पदसंयुक्ता ?

(1) द्वादशपदसंयुक्ता (2) अष्टाङ्गपदसंयुक्ता

(3) नवपदसंयुक्ता (4) एकादशपदसंयुक्ता

(5) अनुत्तरितः प्रश्नः

**74.** कः विदूषकं रक्षति ?

(1) इन्द्रः (2) सरस्वती

(3) ओंकारः (4) पार्वती

(5) अनुत्तरितः प्रश्नः

**75.** भरतमुनिसुतेभ्यः प्रीतः सन् विष्णुः किं दत्तवान् ?

(1) मुकुटम् (2) छत्रम्

(3) सिंहासनम् (4) व्यजनम्

(5) अनुत्तरितः प्रश्नः

**76.** 'बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः' इत्युक्तिः कस्य पात्रस्य ?

(1) राज्ञः (2) कण्वस्य

(3) गौतमस्य (4) सूत्रधारस्य

(5) अनुत्तरितः प्रश्नः

**77.** अनुमालिनीतीरमाश्रमः कस्य ?

(1) मरीचेः (2) कण्वस्य

(3) दुर्वाससः (4) प्रचेतसः

(5) अनुत्तरितः प्रश्नः

78. दुष्यन्तस्य पुरोहितः कः आसीत् ?
(1) गौतमः (2) शार्ङ्गरवः
(3) माढव्यः (4) सोमरातः
(5) अनुत्तरितः प्रश्नः

79. एतासु शार्ङ्गरवस्योक्तिः का वर्तते ?
(1) स्नेहप्रवृत्तिरेवंदर्शिनी
(2) स्वाधीनकुशलाः सिद्धिमन्तः
(3) अज्ञातहृदयेष्वेवं वैरी भवति सौहृदम्
(4) प्रमाणमन्तःकरणप्रवृत्तयः
(5) अनुत्तरितः प्रश्नः

80. अभिज्ञानशाकुन्तले भरतवाक्यस्य वक्ता कः ?
(1) मातलिः (2) विदूषकः
(3) शकुन्तला (4) दुष्यन्तः
(5) अनुत्तरितः प्रश्नः

81. गिरिधरशर्मा नवरत्न–कवेः कृतिरस्ति –
(1) कृष्णाष्टकम्
(2) समस्यासन्दोहः
(3) कारुण्यकादम्बिनी
(4) प्रश्नोत्तररत्नमाला
(5) अनुत्तरितः प्रश्नः

82. 'ललितालहरी' कस्य कृतिरस्ति ?
(1) गिरिधरशर्मणः
(2) श्रीरामदवे–महोदयस्य
(3) जगदीशचन्द्राचार्यस्य
(4) भट्टमथुरानाथशास्त्रिणः
(5) अनुत्तरितः प्रश्नः

83. "गोविन्दवैभवम्" इति काव्यस्य रचयिता कः ?
(1) नित्यानन्दशास्त्री
(2) जगदीशचन्द्राचार्यः
(3) श्रीरामदवे
(4) भट्टमथुरानाथशास्त्री
(5) अनुत्तरितः प्रश्नः

84. भट्टमथुरानाथशास्त्रिणा प्रणीता रसगङ्गाधरस्य टीका का ?
(1) चषकटीका
(2) विलासिनीटीका
(3) सरलाटीका
(4) रसप्रवाहटीका
(5) अनुत्तरितः प्रश्नः

85. "मकरन्दिका" कृतेः रचनाकारोऽस्ति ?
(1) नित्यानन्दशास्त्री
(2) जगदीशचन्द्राचार्यः
(3) श्रीरामदवे
(4) गिरिधरशर्मा नवरत्नः
(5) अनुत्तरितः प्रश्नः

86. जातकर्मसंस्कारः कदा विधीयते ?
(1) चतुर्थे मासि कार्यम्
(2) जन्मनः पञ्चमे मासे
(3) प्राक्केशमुण्डनात्
(4) प्राङ्नाभिवर्धनात्
(5) अनुत्तरितः प्रश्नः

87. "अध्यापनमध्ययनं यजनं याजनं दानं प्रतिग्रहश्च" एतानि कर्माणि कस्य वर्णस्य प्रोक्तानि ?
(1) क्षत्रियस्य (2) ब्राह्मणस्य
(3) वैश्यस्य (4) शूद्रस्य
(5) अनुत्तरितः प्रश्नः

88. सुतविन्यस्तपत्नीकः तया वानुगतो ब्रह्मचारी साग्निः सोपासनः को वनं व्रजेत् ?
(1) ब्रह्मचारी (2) गृहस्थः
(3) संन्यासी (4) वानप्रस्थः
(5) अनुत्तरितः प्रश्नः

89. क्षत्रियस्य कर्माणि सन्ति –
(1) वर्णानां शुश्रूषामानसूयया
(2) कृषिगौरक्ष्यवाणिज्यम्
(3) अध्ययनम् इज्यादानं प्रवचनयाजन–प्रतिग्रहाः
(4) प्रजानां रक्षणं दानमिज्याध्ययनम्
(5) अनुत्तरितः प्रश्नः

90. कः प्रतिदिनं पञ्चयज्ञविधानं कुर्यात् ?
(1) गृही (2) वैखानसः
(3) ब्रह्मचारी (4) सन्न्यासी
(5) अनुत्तरितः प्रश्नः

91. पुरुषसूक्तानुसारं पुरुषस्य मुखात् कौ जातौ ?
(1) चन्द्रमाः सूर्यश्च (2) इन्द्रः अग्निश्च
(3) वायुः अग्निश्च (4) सूर्यः वायुश्च
(5) अनुत्तरितः प्रश्नः

92. ऋषि सूक्तयोः सम्यक् मेलनं चिनुत –
क. मधुच्छन्दा वैश्वामित्रः i. रुद्रसूक्तम्
ख. परमेष्ठी प्रजापतिः ii. सूर्यसूक्तम्
ग. गृत्समदः iii. अग्निसूक्तम्
घ. कुत्सः iv. नासदीयसूक्तम्

**कूट :**

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | iii | iv | ii | i |
| (2) | iii | ii | i | iv |
| (3) | iv | iii | ii | i |
| (4) | iii | iv | i | ii |

(5) अनुत्तरितः प्रश्नः

93. नासदीयसूक्तस्य देवता का ?
(1) नारायणः
(2) गृत्समदः
(3) परमात्मा
(4) मधुच्छन्दा वैश्वामित्रः
(5) अनुत्तरितः प्रश्नः

94. 'यज्ञे कृण्वन्ति विदथेषु धीराः' इति मन्त्रांशस्य देवतानाम किम् ?
(1) अग्निः (2) इन्द्रः
(3) परमेष्ठी प्रजापतिः (4) मनस्
(5) अनुत्तरितः प्रश्नः

95. का विश्वम्भरा, वसुधानी, हिरण्यवक्षा, जगतो निवेशनी च अस्ति ?
(1) उषा (2) वाग्
(3) नदी (4) पृथिवी
(5) अनुत्तरितः प्रश्नः

96. 'दुहामथो उक्षतु वर्चसा' इत्यत्र 'उक्षतु' पदस्य कोऽर्थः ?
(1) सिञ्चतु (2) रक्षतु
(3) पिबतु (4) तुदतु
(5) अनुत्तरितः प्रश्नः

97. गृहस्थः स्मार्तं कर्म कस्मिन्नग्नौ कुर्यात् ?
(1) दक्षिणाग्नौ (2) गार्हपत्याग्नौ
(3) आहवनीयाग्नौ (4) विवाहाग्नौ
(5) अनुत्तरितः प्रश्नः

98. प्रत्येकस्मिन् उत्तरायणे तथा च दक्षिणायने कीदृशो यागः करणीयः ?
(1) सोमयागः (2) पशुयागः
(3) वैश्वदेवयागः (4) वाजपेययागः
(5) अनुत्तरितः प्रश्नः

99. साङ्ख्यतत्त्वगणनायां केवलं विकाराणां सङ्ख्या अस्ति –
(1) सप्त (2) षोडश
(3) त्रयोविंशतिः (4) पञ्चविंशतिः
(5) अनुत्तरितः प्रश्नः

100. सांख्यमते "संघातपरार्थत्वात् त्रिगुणादिविपर्ययाद् ________ कैवल्यार्थं प्रवृत्तेश्च" – कस्य सिद्धिरभिहिताः ?
(1) विकाराणाम् (2) गुणानाम्
(3) प्रकृतेः (4) पुरुषस्य
(5) अनुत्तरितः प्रश्नः

101. विन्ध्यहिमागयोः मध्यं पुण्यभूमिर्वर्तते –
(1) आर्यावर्तः (2) म्लेच्छदेशः
(3) श्रीलङ्का (4) हिन्दूकुशः
(5) अनुत्तरितः प्रश्नः

102. 'पुर्' पर्यायवाचिनः न सन्ति –
(1) आपणः, विपणिः, रथ्या, प्रतोली, विशिखा
(2) पूः, पुरी, नगरी, पुटभेदनम्, निगमः
(3) स्थानीयम्, पुटभेदनम्, पुरी, नगरी, निगमः
(4) पत्तनम्, निगमः, पूः, पुरी, नगरी
(5) अनुत्तरितः प्रश्नः

103. 'वप्रम्' इति कं पर्येति ?
(1) प्राचीरम् (2) प्राकारम्
(3) आपणम् (4) चयम्
(5) अनुत्तरितः प्रश्नः

104. विटङ्कशब्दः कस्मिन् लिङ्गे वर्तते ?
(1) केवलं पुंल्लिङ्गे
(2) केवलं नपुंसकलिङ्गे
(3) पुंल्लिङ्ग–नपुंसकलिङ्गयोः
(4) केवलं स्त्रीलिङ्गे
(5) अनुत्तरितः प्रश्नः

105. एतेषु पर्वतवाचकाः शब्दाः सन्ति –
(1) ग्रावा, अचलः, अद्रिः, महीध्रः, शैलः
(2) शिला, दृषत्, कटकः, शृङ्गम्, प्रस्थः
(3) सानुः, उत्सः, आकरः, उपत्यका
(4) निकुञ्जः, कन्दरः, निर्झरः, गुहा, लोकालोकः
(5) अनुत्तरितः प्रश्नः

106. अधोलिखितानि युग्मानि सम्यक् मेलयत :

| | | | |
|---|---|---|---|
| क. | वराहः | i. | फेरुः |
| ख. | कपिः | ii. | कोलः |
| ग. | शिवाः | iii. | ओतुः |
| घ. | मार्जारः | iv. | कीशः |

कूट :

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | iv | ii | iii | i |
| (2) | ii | iv | i | iii |
| (3) | ii | i | iii | iv |
| (4) | i | ii | iv | iii |

(5) अनुत्तरितः प्रश्नः

107. "कन्यकाजातः, जरसा शौक्ल्यं केशादौ" इत्युभाभ्यां व्युत्पत्तिभ्यां निष्पन्नौ शब्दौ कौ ?
(1) पलितम्, पारस्त्रैणेयः
(2) कानीनः, कौलटेयः
(3) स्वस्रीयः, कान्येयः
(4) कानीनः, पलितम्
(5) अनुत्तरितः प्रश्नः

108. अमरकोषानुसारं सुष्ठु मेलनं कुरुत –

| | | | |
|---|---|---|---|
| क. | गृहस्य पर्यायाः | i. | चत्वारः |
| ख. | पुत्रस्य पर्यायाः | ii. | षोडश |
| ग. | सभागृहस्य पर्यायाः | iii. | दश |
| घ. | काकस्य पर्यायाः | iv. | पञ्च |

कूट :

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | ii | iv | i | iii |
| (2) | ii | i | iv | iii |
| (3) | i | ii | iii | iv |
| (4) | i | iii | iv | ii |

(5) अनुत्तरितः प्रश्नः

109. ण्यप्रत्ययान्ताः शब्दाः सन्ति –
(1) बाह्यः, औत्सः, स्त्रैणः
(2) पौंस्नः, गार्ग्यः, वात्स्यः
(3) दैत्यः, आदित्यः, प्राजापत्यः
(4) दैव्यम्, दैवम्, गव्यम्
(5) अनुत्तरितः प्रश्नः

110. साधु–युग्मं सुमेलयत –

| | | | |
|---|---|---|---|
| क. | बैदः | i. | अण् |
| ख. | द्वैमातुरः | ii. | अञ् |
| ग. | कौन्तेयः | iii. | घ |
| घ. | क्षत्रियः | iv. | ढक् |

कूट :

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | i | ii | iv | iii |
| (2) | i | ii | iii | iv |
| (3) | ii | iv | iii | i |
| (4) | ii | i | iv | iii |

(5) अनुत्तरितः प्रश्नः

**111.** एषु मतुप्–प्रत्ययान्ताः शब्दाः वर्तन्ते –

(1) बलवान्, कृतवान्, भगवान्, शीर्णवान्

(2) गोमान्, धनवान्, बुद्धिमान्, धीमान्

(3) गतवान्, गतिमान्, जीर्णवान्, दत्तवान्

(4) शीलवान्, पर्णवान्, स्मृतवान्, नतवान्

(5) अनुत्तरितः प्रश्नः

**112.** शब्द–प्रत्यययोः सुसंगतं मेलनं कुरुत –

| | |
|---|---|
| क. गोमयः | i. मतुप् |
| ख. गाङ्गः | ii. वलच् |
| ग. शिखावलः | iii. अण् |
| घ. इक्षुमतीः | iv. मयट् |

**कूट :**

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | i | ii | iii | iv |
| (2) | ii | iii | iv | i |
| (3) | iv | ii | iii | i |
| (4) | iv | iii | ii | i |

(5) अनुत्तरितः प्रश्नः

**113.** एतेषु 'यञ्' प्रत्ययस्योदाहरणं किम् ?

(1) राजन्यः (2) बाह्यः

(3) दैत्यः (4) आदित्यः

(5) अनुत्तरितः प्रश्नः

**114.** "हास्तिकम्" इत्यत्र कस्मिन्नर्थे कः प्रत्ययः ?

(1) समूहार्थे ठक् प्रत्ययः

(2) अपत्यार्थे ठञ् प्रत्ययः

(3) निर्वृत्तार्थे ठक् प्रत्ययः

(4) संस्कृतार्थे ठन् प्रत्ययः

(5) अनुत्तरितः प्रश्नः

**115.** अत्र असमीचीनं चिनुत –

(1) पटुः – पटीयान् – पटिष्ठः

(2) प्रियः – प्रियान् – प्रिष्ठः

(3) वृद्धः – वर्षीयान् – वर्षिष्ठः

(4) अल्पः – अल्पीयान् – अल्पिष्ठः

(5) अनुत्तरितः प्रश्नः

**116.** प्रत्ययशब्दयोः सुमेलनं करणीयम् –

| | |
|---|---|
| क. इनि | i. लघिष्ठः |
| ख. ठञ् | ii. व्रीही |
| ग. इञ् | iii. कालिकम् |
| घ. इष्ठन् | iv. बाहविः |

**कूट :**

| | क | ख | ग | घ |
|---|---|---|---|---|
| (1) | ii | iii | iv | i |
| (2) | iii | i | ii | iii |
| (3) | iv | i | ii | iii |
| (4) | iv | ii | iii | i |

(5) अनुत्तरितः प्रश्नः

**117.** अधोलिखित वाक्यमनूद्यताम् :
शिष्य आसन पर बैठता है –

(1) शिष्यः आसने अधितिष्ठति

(2) शिष्यः आसनम् अधितिष्ठति

(3) शिष्यः आसनाय अधितिष्ठति

(4) शिष्यः आसनस्य अधितिष्ठति

(5) अनुत्तरितः प्रश्नः

**118.** 'पुस्तक के कर्त्ता द्वारा ग्रन्थ लिखा जाता है' इत्यस्य संस्कृतेऽनुवादः वर्तते –

(1) पुस्तकं कर्ता ग्रन्थस्य लिखति

(2) पुस्तकस्य कर्तारं ग्रन्थं लिखते

(3) पुस्तकस्य कर्त्रा ग्रन्थो लिख्यते

(4) पुस्तकाय कर्तरि ग्रन्थेऽलिखत्

(5) अनुत्तरितः प्रश्नः

**119.** "विद्या सत्य से शोभित होती है" इत्यस्य संस्कृतेऽनुवादः कतमः ?

(1) विद्या सत्येन शोभते

(2) विद्या सत्यात् शोभते

(3) विद्यां सत्यस्य शोभति

(4) विद्याः सत्येन शोभति

(5) अनुत्तरितः प्रश्नः

**120.** 'देव नौकर से काम कराता है' इत्यस्य वाक्यस्य संस्कृतानुवादः वर्तते –

(1) देवं भृत्येन कार्यं करोति

(2) देवः भृत्यं कार्यं करोति

(3) देवेन भृत्यात् कार्यं कारयति

(4) देवः भृत्येन कार्यं कारयति

(5) अनुत्तरितः प्रश्नः

812125 812125 812125 812125

**121.** अधस्तनेषु किं निर्मितिवादीसिद्धान्ताधारितम् अनुदेशनं न अनुसरति ?

(1) अनुदेशकः विशेषतः समूह-अधिगम रणनीतिभिः सह समस्यानिराकरणं संरचित-अन्वेषणक्रियाकलापं च सूचयति ।

(2) अनुदेशनः ज्ञानसम्प्रेषणस्य अपेक्षया ज्ञाननिर्माणसमर्थनस्य प्रक्रिया अस्ति ।

(3) अनुदेशनेन अधिगमकर्तारः वास्तविकजगत्स्थितौ साधनानां वास्तविकप्रयोगे संलग्नाः भवेयुः ।

(4) अनुदेशकः सुगमकर्ता (Facilitator) तथा च सहपाठि-अन्तःक्रियायाः मार्गदर्शकः (Mentor) भवति ।

(5) अनुत्तरितः प्रश्नः

**122.** संज्ञानात्मकप्रक्रियायाः आरम्भः भवति –

(1) इन्द्रियनिवेशेन (2) तर्केण

(3) सम्प्रत्ययनिर्माणेन (4) भाषाज्ञानेन

(5) अनुत्तरितः प्रश्नः

**123.** "संवेगात्मकविकासेन सह सामाजिकविकासः चलति" वाक्यमिदं केन प्रतिपादितम् ?

(1) क्रो एवं क्रो (2) हरलॉक

(3) एलिस क्रोमसन (4) सोरेनसन

(5) अनुत्तरितः प्रश्नः

**124.** निम्नलिखितेषु किशोरावस्थायां संवेगात्मकविकासस्य विशेषता अस्ति :

(1) भावप्रधानजीवनम्

(2) भावतीव्रतायां न्यूनता

(3) जिज्ञासायां प्रबलता

(4) प्रफुल्लता

(5) अनुत्तरितः प्रश्नः

**125.** 'ब्रूनर' (Brüner) महोदयानुसारं कस्यामवस्थायां दृश्यस्मृति विकसिता भवति ?

(1) क्रियात्मकावस्थायाम्

(2) प्रतिबिम्बात्मकावस्थायाम्

(3) संकेतात्मकावस्थायाम्

(4) औपचारिकसंक्रियावस्थायाम्

(5) अनुत्तरितः प्रश्नः

**126.** हलमहोदयस्य अधिगमसिद्धान्तस्य नाम किम् ?

(1) परिकल्पित-निगमनात्मकविधिः

(2) शाब्दिकव्यवहारविधिः

(3) सम्बन्धात्मकविधिः

(4) कार्यक्रमिताधिगमविधिः

(5) अनुत्तरितः प्रश्नः

**127.** मनोविज्ञानस्य व्यवहारवाद-सम्प्रदायेन कः सम्बद्धः नास्ति ?

(1) ई.सी. कोहलर (2) बी.एफ. स्कीनर

(3) जे.आर. कैनटोर (4) जे.बी. वाटसन

(5) अनुत्तरितः प्रश्नः

**128.** समीपस्थविकासक्षेत्रे (Zone of Proximal Development) अधिगमार्थं ________ आवश्यकमस्ति ।

(1) स्कीमा (Schema) इति

(2) संज्ञानात्मकचित्रम् (Cognitive Map) इति

(3) सम्प्रत्ययचित्रम् (Concept Map) इति

(4) स्कैफोल्डिंग (Scaffolding) इति

(5) अनुत्तरितः प्रश्नः

**129.** अधोलिखितेषु कः व्यवहारवादि-अधिगमसिद्धान्तस्य प्रकटीकरणं करोति ?

(1) अधिगमे विषयवस्तूनां गहनप्रसंस्करणं (Processing) भवति ।

(2) अधिगमे सहकार्यं सहयोगं च अन्तर्भवति ।

(3) यदा विशिष्टोत्तेजकस्य प्रस्तुतीकरणेन सम्यक् प्रतिक्रिया दृश्यते तदा अधिगमः भवति ।

(4) अधिगमः ज्ञानस्य अवस्थायाः परिवर्तनम् अस्ति ।

(5) अनुत्तरितः प्रश्नः

**130.** अधिगमः पूर्णरूपेण भवति –

(1) जन्मसिद्धः

(2) आकस्मिक उपलब्धिः

(3) उपार्जितव्यवहारः

(4) प्रतिभाजन्यः

(5) अनुत्तरितः प्रश्नः

131. मानसिक–स्वास्थ्यस्य अभिप्रायः वर्तते –
(1) शारीरिकस्वस्थता
(2) शारीरिकास्वस्थता
(3) संवेगात्मकस्थिरता
(4) संवेगात्मकास्थिरता
(5) अनुत्तरितः प्रश्नः

132. मानसिकस्वास्थ्यम् एका ________ अस्ति –
(1) अपरिवर्तनशीलधारणा
(2) गतिशीलधारणा
(3) असामान्यधारणा
(4) प्रतिकूल–अवधारणा
(5) अनुत्तरितः प्रश्नः

133. 'सांवेगिकबुद्धि' इत्यस्य विषये अधोलिखित कथनेषु एकं कथनं समुचितं नास्ति । तच्च कथनमस्ति –
(1) स्वस्य संवेगानां ज्ञानम् ।
(2) परेषां संवेगानां ज्ञानं प्रबन्धनञ्च ।
(3) सांवेगिकबुद्धि–आधारेण जीवने 80% साफल्यं मिलति ।
(4) "सांवेगिकबुद्धि" नामाख्यं किमपि तत्वं नास्ति बुद्धिलब्धिरेव सर्वम् ।
(5) अनुत्तरितः प्रश्नः

134. संवेगात्मकबुद्धेः समुचितविकासाय आवश्यकमस्ति यत् –
(1) संवेगानां सम्यक् प्रत्यक्षीकरणाय उचितयोग्यतानां क्षमतानाञ्च विकासो भवेत्
(2) अन्येषां भावनाः संवेगाश्च नकारात्मकरूपेण दृष्टव्याः
(3) वैचारिकादान–प्रदानस्य हतोत्साहः स्यात्
(4) संवेगेषु कस्यापि नियन्त्रणं न भवेत्
(5) अनुत्तरितः प्रश्नः

135. मानसिक–आरोग्यतायाः उद्देश्यं नास्ति –
(1) मानसिकस्वास्थ्यस्य रक्षणम्
(2) मानसिकरोगाणां विकाराणां च निरोधः
(3) मानसिकरोगाणाम् उपचारः
(4) मानसिकरोगाणाम् अभिसूचनम्
(5) अनुत्तरितः प्रश्नः

136. 'एकस्य प्रश्नस्य एकम् उत्तरं न भवति । किमपि वक्तुं बहुविधाः सन्ति, समस्यायाः समाधानस्य च बहवः उपायाः सन्ति ।' अयं विचारः कस्य आदर्शेन सह सर्वोत्तमरूपेण सम्बद्धः अस्ति ?
(1) अग्रिमसंघटकप्रतिमानस्य
(2) वैज्ञानिकपृच्छाप्रतिमानस्य
(3) आगमनप्रतिमानस्य
(4) सम्प्रत्ययप्राप्तिप्रतिमानस्य
(5) अनुत्तरितः प्रश्नः

137. क्रियात्मक–अधिगमोद्देश्यार्थं अधस्तनेषु का शिक्षणाधिगमसहायकसामग्री सर्वासु उपयुक्ता अस्ति ?
(1) रेडियो (2) रेखाचित्रम्
(3) भाषाप्रयोगशाला (4) चलचित्रम्
(5) अनुत्तरितः प्रश्नः

138. प्रणाली–उपागमे (System Approach) एकं पदं भवति तत् अन्यान् त्रयान् पदान् नियन्त्रयति, परस्परं समन्वयं स्थापयति येन समुचितं परस्परं समन्वयः स्यात् उत्पादनं च स्यात् –
तत् पदं किम् ?
(1) वातावरणम् (Environment)
(2) अदा (Input)
(3) प्रदा (Output)
(4) प्रक्रिया (Process)
(5) अनुत्तरितः प्रश्नः

139. विशेषतया भौतिकशास्त्रस्य समस्यां स्वीकृत्य कस्य प्रतिमानस्य विकास अभवत् ?
(1) ऐतिहासिकप्रतिमानस्य
(2) दार्शनिकशिक्षणप्रतिमानस्य
(3) पृच्छाप्रशिक्षणप्रतिमानस्य
(4) आत्मनियन्त्रणप्रतिमानस्य
(5) अनुत्तरितः प्रश्नः

140. निर्मितिवादे ज्ञान–निर्माणं भवति –
(1) जन्मजातशक्त्या (2) सूचनासम्प्रेषणेन
(3) स्वकीयप्रयत्नेन (4) प्रत्यक्ष–निर्देशनेन
(5) अनुत्तरितः प्रश्नः

141. सूचनासम्प्रेषणप्रौद्योगिक्याः सीमा (Limitation) विषये एतत् कथनं सत्यमस्ति –
- i. सुविधानां परिस्थितिनाञ्च अल्पता
- ii. पुरातनशिक्षणाधिगमविधिषु शिक्षकाणामासक्तिः
- iii. प्रौद्योगिक्याः उपयोगविषये अल्पज्ञानम्
- iv. शिक्षायाः वैश्विकीकरणं विस्तारश्च

(1) i, ii (2) ii, iv
(3) iii, iv (4) i, ii, iii
(5) अनुत्तरितः प्रश्नः

142. सॉफ्टवेयर (Software) भवति –
(1) इनपुट-उपकरण-समूहः
(2) आउटपुट-उपकरण-समूहः
(3) कार्यक्रम-समूहः
(4) सञ्चय-उपकरण-समूहः
(5) अनुत्तरितः प्रश्नः

143. प्रणाली-उपागमसन्दर्भे शैक्षिकप्रक्रियायाः प्रभावशीलतायाः कारणमस्ति –
(1) प्रबन्धन-व्यवस्था-प्रौद्योगिकीनां समन्वयः
(2) हार्डवेयर-सॉफ्टवेयर-मानवीयकौशलानां समन्वयः
(3) हार्डवेयर-मनोविज्ञान-प्रबन्धनानाञ्च समन्वयः
(4) दर्शन-प्रबन्धन-प्रौद्योगिकीनाञ्च समन्वयः
(5) अनुत्तरितः प्रश्नः

144. सूचनासम्प्रेषण-प्रविधेः कस्याः शाखायाः विकासः अभियान्त्रिकी भौतिक-विज्ञानयोः माध्यमेनाभवत् ?
(1) प्रणालीविश्लेषणम् (System Analysis)
(2) मृदुलवस्तूपागमः (Software Approach)
(3) स्थूलवस्तूपागमः (Hardware Approach)
(4) प्रबन्ध-प्रविधिः (Management Technology)
(5) अनुत्तरितः प्रश्नः

145. शैक्षिकसम्प्रेषणप्रक्रियायां सम्प्रेषणस्य सन्दर्भः नास्ति –
(1) भौतिक-सन्दर्भः (2) सामाजिक-सन्दर्भः
(3) दार्शनिक-सन्दर्भः (4) समय-सन्दर्भः
(5) अनुत्तरितः प्रश्नः

146. निम्नलिखितेषु मनोविज्ञानदृष्ट्या शिक्षकेषु आन्तरिकप्रेरणं वर्धयितुं शक्नोति :
(1) स्वायत्तता प्रदानम्
(2) मान्यता
(3) पुरस्कारः प्रोत्साहनं च
(4) बाह्यप्रभावः
(5) अनुत्तरितः प्रश्नः

147. बर्नाड-महोदयानुसारं, मनोवैज्ञानिकदृष्ट्या शिक्षणाधिगमप्रक्रियायां त्रीणि तत्त्वानि भवन्ति –
(1) छात्रः, शिक्षकः, विद्यालयश्च
(2) छात्रः, शिक्षकः, अधिगमश्च
(3) छात्रः, शिक्षकः, तकनीकी च
(4) प्रवेशः, शिक्षणं, मूल्याङ्कनञ्च
(5) अनुत्तरितः प्रश्नः

148. मनोवैज्ञानिकानुसारम् अधिगमकर्तुः विलोपनस्य प्रक्रिया कदा उत्पन्ना भवति ?
(1) अधिगमात् प्राक्
(2) अधिगमात् अनन्तरम्
(3) अभिप्रेरणायाः प्राक्
(4) अभिप्रेरणायाः अनन्तरम्
(5) अनुत्तरितः प्रश्नः

149. शिक्षकाय शिक्षामनोविज्ञानस्य ज्ञानमावश्यकमस्ति –
(1) आर्थिकसम्बलनाय
(2) सामाजिकप्रतिष्ठायै
(3) वैयक्तिक विभिन्नतानां मापनाय
(4) प्रशासनिक-दक्षतायै
(5) अनुत्तरितः प्रश्नः

150. अग्रांकितेषु शिक्षकस्य कृते मनोविज्ञानस्य मुख्यमहत्त्वम् अस्ति ?
(1) छात्राणां विषये उत्तमम् अवगमनम् ।
(2) विद्यालयस्य समस्यानां प्रभावीरूपेण समाधानम् ।
(3) कक्षायां विज्ञानस्य नियमानां प्रयोगः ।
(4) जगत् प्रति स्वस्य दुर्विचारान् शोधनम् ।
(5) अनुत्तरितः प्रश्नः

## रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK

812125

812125

812125

812125